तस्य टेः प्लुतो भवति विभाषा[1]। अनित्यः शब्दः इति केनचित् प्रतिज्ञातम्, तम् [2]उपालिप्सुः उपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते, अनित्यः शब्द इत्यात्थ३, अनित्यः शब्द इत्यात्थ। अद्य श्राद्धमित्यात्थ३, अद्य श्राद्धमित्यात्थ। अद्यामावास्येत्यात्थ३, अद्यामावास्येत्यात्थ। अद्य अमावास्या इत्येवं [3]वादी युक्त्या प्रच्याव्य स्वमतादेवम[4]नुयुज्यते ॥

## आम्रेडितं भर्त्सने। (९५/३६१४)

[5]वाक्यादेः आमन्त्रितस्य (८.१.८/२१४३) इति भर्त्सने द्विर्वचनमुक्तम्, तस्य आम्रेडितं प्लवते। चौर चौर३, वृषल वृषल३, दस्यो दस्यो३, [6]घातयिष्यामि त्वा, बन्धयिष्यामि त्वा।

[९३०] भर्त्सने पर्यायेणेति वक्तव्यम्।

चौर३ चौर, चौर चौर३। तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति ॥

## अङ्गयुक्तं तिङाकाङ्क्षम्। (९६/३६१५)

अङ्ग [7]इत्यनेन युक्तं तिङन्तमाकाङ्क्षं भर्त्सने[8] प्लवते[9]। अङ्ग कूज३, अङ्ग व्याहर३, इदानीं ज्ञास्यसि जाल्म। तिङ इति किम्? अङ्ग देवदत्त, मिथ्या वदसि। आकाङ्क्षम् इति किम्? अङ्ग पच। नैतदपरमाकाङ्क्षति। भर्त्सने इत्येव, अङ्गाधीष्व, ओदनं ते दास्यामि ॥

## विचार्यमाणानाम्। (९७/३६१६)

[10]प्रमाणेन वस्तुपरीक्षणं विचारः, तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति। 'होतव्यं दीक्षितस्य गृहा३इ। (तै. ६.१.४.५)। होतव्यं न होतव्यम् इति विचार्यते। तिष्ठेद्यूपा३इ। अनुप्रहरेद्यूपा३इ। यूपे तिष्ठेत्, यूपे अनुप्रहरेत् इति विचार्यते ॥

## पूर्वं तु भाषायाम्। (९८/३६१७)

भाषायां विषये विचार्यमाणानां पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु। लोष्ठो नु३ कपोतो नु[11]। प्रयोगापेक्षं पूर्वत्वम्। [12]इह भाषाग्रहणात् पूर्वयोगश्छन्दसि विज्ञायते ॥

## प्रतिश्रवणे च। (९९/३६१८)

प्रतिश्रवणम् अभ्युपगमः, प्रतिज्ञानम्। श्रवणाभिमुख्यं [13]च [14]तत्राविशेषात् सर्वस्य [15]ग्रहणम्। प्रतिश्रवणे यद् वाक्यं वर्तते तस्य टेः प्लुतो भवति। गां मे देहि भोः, अहं ते ददामि३। नित्यः शब्दो भवितुमर्हति३। देवदत्त भोः, किमात्थ३ ॥

---

1. चकारोऽत्र विभाषानुकर्षणार्थः इत्यधिकम् ह. 2. उपालिप्सुः नास्ति ह. 3. वादी नास्ति इ, वादिनम् ड. 4. अनुमण्डचते ड. 5. आम्रेडितसञ्ज्ञकं भर्त्सने प्लवते इ, भर्त्सनेऽर्थे आम्रेडितं प्लवते ब. 6. मारयिष्यामि त्वां बाधयिष्यामि इ.ह.ड. 7. इत्येतेन क. 8. प्लुतं भवति क. 9. आकाङ्क्षति इति आकाङ्क्षम्, यद् वक्ष्यमाणं किञ्चित् अपरम् आकाङ्क्षति इत्यधिकम् ब.ह. 10. प्रमाणैः ड. 11. स्थाणुर्नु पुरुषो नु इत्यधिकम् इ. क. ड. 12. वाक्यमिदं नास्ति इ. 13. वा ह. 14. तत्र विशेषाभावात् इ. 15. प्रतिश्रवणस्य इत्यधिकम् इ.